श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ षडशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षडशीतितमः सर्गः ॥

## इन्द्रं विना जगत्यशान्तिरश्वमेधानुष्ठानेनेन्द्रस्य ब्रह्महत्यातो मुक्तिश्च

तदा वृत्रवधं सर्वमखिलेन स लक्ष्मणः।
कथयित्वा नरश्रेष्ठः कथाशेषं प्रचक्रमे॥ **7.86.1** ॥

ततो हते महावीर्ये वृत्रे देवभयङ्करे।
ब्रह्महत्यावृतः शक्रः संज्ञां लेभे न वृत्रहा॥ **7.86.2** ॥

सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः।
कालं तत्रावसत् कञ्चिद् वेष्टमान इवोरगः॥ **7.86.3** ॥

अथ नष्टे सहस्राक्षे उद्विग्नमभवज्जगत्।
भूमिश्च ध्वस्तसङ्काशा निःस्नेहा शुष्ककानना॥ **7.86.4** ॥

निःस्रोतसस्ते सर्वे तु ह्रदाश्च सरितस्तथा।
सङ्क्षोभश्चैव सत्त्वानामनावृष्टिकृतोऽभवत्॥ **7.86.5** ॥

क्षीयमाणे तु लोकेऽस्मिन् सम्भ्रान्तमनसः सुराः।
यदुक्तं विष्णुना पूर्वं तं यज्ञं समुपानयन्॥ **7.86.6** ॥

ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः।
तं देशं समुपाजग्मुर्यत्रेन्द्रो भयमोहितः॥ **7.86.7** ॥

ते तु दृष्ट्वा सहस्राक्षमावृतं ब्रह्महत्यया।
तं पुरस्कृत्य देवेशमश्वमेधं प्रचक्रिरे॥ **7.86.8** ॥

ततोऽश्वमेधः सुमहान् महेन्द्रस्य महात्मनः।
ववृते ब्रह्महत्यायाः पावनार्थं नरेश्वर॥ **7.86.9** ॥

ततो यज्ञे समाप्ते तु ब्रह्महत्या महात्मनः।
अभिगम्याब्रवीद् वाक्यं क्व मे स्थानं विधास्यथ॥ **7.86.10** ॥

ते तामूचुस्ततो देवास्तुष्टाः प्रीतिसमन्विताः।
चतुर्धा विभजात्मानमात्मनैव दुरासदे॥ **7.86.11** ॥

देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम्।
सन्दधौ स्थानमन्यत्र वरयामास दुर्वसा॥ **7.86.12** ॥

एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै।
चतुरो वार्षिकान् मासान् दर्पघ्नी कामचारिणी॥ **7.86.13** ॥

भूम्यामहं सर्वकालमेकेनांशेन सर्वदा।
वसिष्यामि न सन्देहः सत्येनैतद् ब्रवीमि वः॥ **7.86.14** ॥

योऽयमंशस्तृतीयो मे स्त्रीषु यौवनशालिषु।
त्रिरात्रं दर्पपूर्णासु वसिष्ये दर्पघातिनी॥ **7.86.15** ॥

हन्तारो ब्राह्मणान् ये तु मृषापूर्वमदूषकान्।
तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः॥ **7.86.16** ॥

प्रत्यूचुस्तां ततो देवा यथा वदसि दुर्वसे।
तथा भवतु तत् सर्वं साधयस्व यदीप्सितम्॥ **7.86.17** ॥

ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे।
विज्वरः पूतपाप्मा च वासवः समपद्यत॥ **7.86.18** ॥

प्रशान्तं च जगत् सर्वं सहस्राक्षे प्रतिष्ठिते।
यज्ञं चाद्भुतसङ्काशं तदा शक्रोऽभ्यपूजयत्॥ **7.86.19** ॥

ईदृशो ह्यश्वमेधस्य प्रभावो रघुनन्दन।
यजस्व सुमहाभाग हयमेधेन पार्थिव॥ **7.86.20** ॥

इति लक्ष्मणवाक्यमुत्तमं
    नृपतिरतीव मनोहरं महात्मा।
परितोषमवाप हृष्टचेता
    निशमय्येन्द्रसमानविक्रमौजाः॥ **7.86.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे षडशीतितमः सर्गः॥